श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

देवनायक पञ्चाशत्

श्रीमान् वेङ्कट नाथार्यः कविताार्किक केसरी।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि॥

प्रणत सुर किरीट प्रान्त मन्दार माला
विगलित मकरन्द स्निग्ध पादार विन्दः।
पशुपति विधि पूज्यः पद्म पत्रायताक्षः
फणिपति पुरनाथः पातु मां देव नाथः॥१

देवाधि नाथ कमला पृतनेश पूर्वां
दीप्तान्तरां वकुल भूषण नाथ मुख्यैः।
रामानुज प्रभृतिभिः परि भूषिताग्र्यां
गोप्त्रीं जगन्ति गुरुपङ्क्तिं अहं प्रपद्ये॥२

दिव्ये दया जलनिधौ दिविषन् नियन्तुः
तीर्थं निदर्शित वतः त्रि जगन् निषेव्यम्।
प्राचः कवीन् निगम संमित सूनृतोक्तीन्
प्राचेतस प्रभृतिकान् प्रणमाम् यभीक्ष्णम्॥३

मातः त्वम् अम्बुरुह वासिनि किञ्चिदेतत्
विज्ञाप्यते मयि कुरुष्व तथा प्रसादम्।
आकर्ण यिष्यति यथा विबुधेश्वरस्ते
प्रेयानसौ पृथुक जल्पितवन् मदुक्तिम्॥४

निर्विश्यमान विभवं निगमोत्त माङ्गैः

स्तुतुं क्षमं मम च देवपते भवन्तम्।
गावः पिबन्तु गणशः कलशाम्बुराशिं
किं तेन तर्णक गणास् तृण माददानाः॥५

अज्ञात सीमकम् अनन्त गरुत्मदाद्यैः
तं त्वां समाधि नियतैर् अपि सामि दृष्टम्।
तुष्टूषतो मम मनोरथ सिद्धि दायी
दासेषु सत्य इति धारय नामधेयम्॥६

विश्राणयन् मम विशेष विदाम् अनिन्द्याम्
अन्तर्वतीम् गिरम् अहीन्द्र पुराधि राज।
स्तव्यस् स्तवप्रिय इतीव तपोध नोक्तं
स्तोतेति च त्वद् अभिधानम् अवन्ध्यय त्वम्॥७

संरक्षणीयम् अमराधिपते त्वयैव
दूरं प्रयातमपि दुस्त्यज गाढबन्धम्।
आकृष्ट वानसि भवान् अनुकम्प मानः
सूत्रानु बद्ध शकुनि क्रमतः स्वयं माम्॥८

व्यामोहिता विविध भोग मरीचिकाभिः
विश्रान्ति मद्य लभते विबुधैक नाथ।
गम्भीर पूर्ण मधुरं ममधीर् भवन्तं
ग्रीष्मे तटाकमिव शीतम् अनुप्रविष्टा॥९

दिव्ये पदे जलनिधौ निगमोत्त माङ्गे
स्वान्ते सतां सवितृ मण्डल मध्य भागे।
ब्रह्माचले च बहुमान पदे मुनीनां
व्यक्तिं तव त्रिदश नाथ वदन्ति नित्याम्१०

तीर्थैर् वृतं वृजिन दुर्गति नाशनार्हैः
शेष क्षमा विहगराज विरिञ्चि जुष्टैः।
नाथ त्वया नत जनस्य भवौषधेन

प्रख्यात मौषध गिरिं प्रणमन्ति देवाः ॥११

स्वाधीन विश्व विभवं भगवन् विशेषात्
त्वां देवनायक मुशन्ति परावरज्ञाः ।
प्रायः प्रदर्शयितुम् एतद् इति प्रतीमः
त्वद् भक्थि भूषित धियाम् इह देवभावम् ॥१२

तत्त्वानि यानि चिदचित् प्रविभागवन्ति
त्रय्यन्त वृत्ध गणितानि सितासितानि
दीव्यन्ति तानि अहिपुरन्दर धामनाथ
दिव्यास्त्र भूषण तया तव विग्रहेऽस्मिन् ॥१३

भूषायुधैर् अधिगतं निजकान्ति हेतोः
भुक्तं प्रयाभिर् अनिमेष विलोचनाभिः ।
प्रत्यङ्ग पूर्ण सुषमा सुभगं वपुस्ते
दृष्ट्वा दृशौ विबुध नाथ न तृप्यतो मे ॥१४

वेदेषु निर्जरपते निखिलेष्वधीतं
व्यासादिभिर् बहुमतं तव सूक्तम् अग्र्यम् ।
अङ्गान्यमूनि भवतः सुभगान् यधीते
विश्वं विभो जनितवन्ति विरिञ्चि पूर्वम् ॥१५

देवेश्वर त्वमिह दर्शयितुम क्षमस्ते
नाथ त्वयाऽपि शिरसा विधृतः किरीटः
एकीकृत द्युमणि बिम्ब सहस्र दीप्तिः
निर्मूलयन् मनसि मे निबिडं तमिस्त्रम् ॥१६

मुग्ध स्मितामृत शुभेन मुखेन्दुना ते
संगम्य संसरण सञ्ज्वर शान्तये नः ।
संपद्यते विबुधनाथ समाधि योग्या
शार्वरयसौ कुटिल कुन्तल कान्ति रूपा ॥१७

बिम्बाधरं विकच पङ्कज लोचनं ते
लम्बालकं ललित कुण्डल दर्शनीयम्।
कान्तं मुखं कनक कैतक कर्णपूरं
स्वान्तं विभूषयति देवपते मदीयम्॥१८

लब्धा तिथौ क्वचिदियं रजनी करेण
लक्ष्मीः स्थिरा सुरपते भवतो ललाटे।
यत् स्वेद बिन्दु कणिकोद्गत बुद्बुदान्तः
त्र्यक्षः पुरा स पुरुषोऽजनि शूल पाणिः॥१९

लावण्य वर्षिणि ललाट तटे घनाभे
बिभ्रत् तटिद्गुण विशेषम् इव ऊर्ध्व पुण्ड्रम्।
विश्वस्य निर्जरपते तमसाऽऽवृतस्य
मन्ये विभावयसि माङ्गलिक प्रदीपम्॥२०

आहुः श्रुतिं विबुधनायक तावकीनाम्
आशागण प्रसव हेतुम् अधीत वेदाः।
आकर्णिते तदियम् आर्तरवे प्रजानाम्
आशाः प्रसाधयितुम् आदिशति स्वयम् त्वाम्॥२१

कन्दर्प लाञ्छन तनुस्त्रिदशैक नाथ
कान्ति प्रवाह रुचिरे तव कर्ण पाशे
पुष्यत् यसौ प्रतिमुख स्थिति दर्शनीया
भूषामयी मकरिका विविधान् विहारान्॥२२

नेतुम् सरोज वसतिर् निजमाधि राज्यं
नित्यम् निशामयति देवपते भ्रुवौ ते।
एवं न चेदखिल जन्तु विमोहनार्हा
किं मातृका भवति काम शरासनस्य॥२३

आलक्ष्य सत्वम् अतिवेल दयोत्तरङ्गम्
अभ्यर्थि नाम् अभिमत प्रतिपाद नार्हम्।

स्निग्धायतं प्रथिम शालि सुपर्व नाथ
दुग्धाम्बुधेर् अनुकरोति विलोचनं ते ॥२४

विश्वाभिर् अक्षण विहार कृतक्षणैस्ते
वैमानिकाधिप विडम्बित मुग्ध पद्मैः।
आमोद वाहिभि रनामय वाक्यगर्भैः
आर्द्री भवाम् यमृत वर्षनिभैर् अपाङ्गैः ॥२५

नित्योदितैर् निगम निः श्वसितैस् तवैषा
नासा नभश्चरपते नयनाब्धि सेतु।
आम्रेडित प्रियतमा मुखपद्म गन्धैः
आश्वासिनी भवति सम्प्रति मुह्यतो मे ॥२६

आरुण्य पल्लवित यौवन पारिजातम्
आभीर योषिद् अनुभूतम् अमर्त्य नाथ।
वंशेन शङ्ख पतिना च निषेवितं ते
बिम्बाधरं स्पृशति रागवती मतिर् मे ॥२७

पद्मालया वलय दत्त सुजात रेखे
त्वत् कान्ति मेचकित शङ्ख निभे मतिर्मे।
विस्मेर भाव रुचिरा वनमालिकेव
कण्ठे गुणीभवति देवपते त्वदीये ॥२८

आजानु लम्बिभिर् अलङ्कृत हेति जालैः
ज्याघात राजि रुचिरैर् जित पारिजातैः।
चित्राङ्गदैः त्रिदश पुङ्गव जात सङ्गा
त्वद्बाहुभिर् मम दृढं परि रभ्यते धीः२९

नीलाच लोदित निशाकर भास्कराभे
शान्ता हिते सुरपते तव शङ्ख चक्रे।
पाणेर मुष्य भजताम् अभय प्रदस्य
प्रत्यायनं जगति भावयतः स्वभूम्ना ॥३०



rmvenkat@yahoo.com

अक्षोभणीय करुणाम्बुधि विद्रुमाभम्
भक्तानुरञ्जनं अमर्त्य पते त्वदीयम्।
नित्यापराध चकिते हृदये मदीये
दत्ताभयं स्फुरति दक्षिण पाणि पद्मम्॥३१

दुर्दान्त दैत्य विशिख क्षत पत्र भङ्गं
वीरस्य ते विबुध नायक बाहु मध्यम्।
श्रीवत्स कौस्तुभ रमा वनमालि काङ्कम्
चिन्ता अनुभूय लभते चरितार्थतां नः॥३२

वर्ण क्रमेण विबुधेश विचित्रि ताङ्गी
स्मेर प्रसून सुभगा वनमालि केयम्।
हृद्या सुगन्धि रजहत् कमला मणीन्द्रा
नित्या तव स्फुरति मूर्तिर् इव द्वितीया॥३३

आर्द्रं तमो मथनम् आश्रित तारकं ते
सुद्धं मनः सुमनसां अमृतम् दुहानम्।
तत् तादृशं विबुध नाथ समृद्ध कामं
सर्गेष्विदं भवति चन्द्र मसां प्रसूतिः॥३४

विश्वं निगीर्य विबुधेश्वर जात कार्श्यं
मध्यं वलित्र्य विभाव्य जगद् विभागम्।
आमोदि नाभि नलिनस्थ विरिञ्च भृङ्गम्
आकल्पयत् युदर बन्ध इवाशयो मे॥३५

नाकौ कसां प्रथमता मधि कुर्वते ते
नाभी सरोज रजसां परिणाम भेदाः।
आराधयद्भिर् इहतैर् भवतः समीची
वीरोचिता विबुध नायक इत्य भिख्या॥३६

पीताम्बरेण परिवारवती सुजाता

दास्ये निवेशयति देव पदे दृशौ मे।
विन्यस्त सव्य कर सङ्गम जायमान-
रोमाञ्च रम्य किरणा रशना त्वदीया॥३७

स्त्री रत्न कारणम् उपात्त तृतीय वर्णम्
दैत्येन्द्र वीर शयनं दयितो पधानम्
देवेश यौवन गजेन्द्र कराभि रामम्
ऊरी करोति भवद् ऊरुयुगं मनो मे॥३८

लावण्य पूर ललितोर्ध्व परिभ्र माभं
लक्ष्मी विहार मणि दर्पण बद्ध सख्यम्।
गोपाङ्गणेषु कृत चङ्क्रमणं तवैतत्
जानुद्वयं सुरपते न जहाति चित्तम्॥३९

दूत्ये दुकूल हरणे व्रज सुन्दरीणाम्
दैत्यानु धावन विधावपि लब्ध साह्यम्।
कन्दर्प काहल निषङ्ग कलाचि काभं
जङ्घायुगं जयति देव पते त्वदीयम्४०

पाषाण निर्मित तपोधन धर्म दारं
भस्मन् युपाहित नरेन्द्र कुमार भावम्।
संवाहितं त्रिदश नाथ रमा महीभ्यां
सामान्य दैवतम् उशन्ति पदं त्वदीयम्॥४१

आवर्जिताभि रनुषज्य निजांशु जालैः
देवेश दिव्य पद पद्म दलायि ताभिः।
अन्याभिलाष परिलोलमिदं मदीयम्
अङ्गीकृतं हृदयं अङ्गुलिभिः स्वयं ते॥४२

पङ्कान्यसौ मम निहन्ति महः तरङ्गैः
गङ्गाधिकां विद धती गरुड स्रवन्तीम्।
नाकौकसां मणि किरीट गणैर् उपास्या

नाथ त्वदीय पदयोर् नख रत्न पङ्क्तिः ॥४३

वज्र ध्वजाङ्कुश सुधा कलशात पत्र
कल्प द्रुमाम्बुरुह तोरण शङ्ख चक्रैः ।
मत्स्यादिभिश्च विबुधेश्वर मण्डितं ते
मान्यं पदं भवतु मौलि विभूषणं नः ॥४४

चित्रं त्वदीय पद पद्म पराग योगाद्
योगं विनाऽपि युगपद् विलयं प्रयान्ति ।
विष्वञ्चि निर्जर पदे शिरसि प्रजानां
वेधः स्वहस्त लिखितानि दुरक्षराणि ॥४५

ये जन्म कोटिभिर् उपार्जित शुद्ध धर्माः
तेषां भवच्चरण भक्तिर् अतीव भोग्या ।
त्वज्जीवितैः त्रिदश नायक दुर्लभैस्तैः
आत्मानं अप्यकथयः स्वयं आत्म वन्तम् ॥४६

निष्किञ्च नत्व धनिना विबुधेश येन
न्यस्तः स्वरक्षण भरस्तव पाद पद्मे ।
नानाविद प्रथित योग विशेष धन्याः
नार्हन्ति तस्य शत कोटि तमांश कक्ष्याम् ॥४७

आत्मा पहार रसिकेन मयैव दत्तम्
अन्यैर् अधार्यम् अधुना विबुधैक नाथ ।
स्वीकृत्य धारयितुं अर्हसि मां त्वदीयम्
चोरोपनीत निज नूपुरवत् स्वपादे ॥४८

अज्ञान वारिधिं अपाय धुरन्धरं मां
आज्ञा विभञ्जनं अकिञ्चन सार्व भौमम् ।
विन्दन् भवान् विबुध नाथ समस्त वेदी
किं नाम पात्रम् अपरं मनुते कृपायाः ॥४९

प्र ाद गोकुल गजेन्द्र परिक्षिदाद्याः
त्रातास् त्वया ननु विपत्तिषु तादृशीषु
सर्वं तदेकम् अपरं मम रक्षणं ते
सन्तोल्यतां त्रिदश नायक किं गरीयः ॥५०

वात्या शतैर् विषय राग दया विवृत्तैः
व्याघूर्णमान मनसं विबुधाधिराज ।
नित्योपतप्त इति मां निज कर्म घर्मैः
निर्वेशय स्वपद पद्म मधु प्रवाहम् ॥५१

जय विबुध पते त्वं दर्शिता भीष्ट दानः
सह सरसिज वासा मेदिनीभ्यां वशाभ्याम् ।
नलव नमिव मृद्नन् पापराशिं नतानां
गरुड सरिद् नूपे गन्ध हस्तीव दीव्यन् ॥५२

निरवधि गुण जातं नित्य निर्दोषम् आद्यं
नरक मथन दक्षं नाकिना मेक नाथम् ।
विनत विषय सत्यम् वेङ्कटेशः कविस्त्वाम्
स्तुति पद मधि गच्छन् शोभते सत्यवादी ॥५३

कवितार्किक सिंहाय कल्याण गुण शालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः ॥

---

Please send your comments and suggestions to R.Venkat